# .. vakArAdi shrI vAmanAShTottarashatanAmAvaliH ..

# ॥ वकारादि श्रीवामनाष्टोत्तरशतनामावलिः ॥

## Document Information

Text title : vakArAdi vAmanAShTottarashatanAmAvaliH

File name : vakArAdivAmana108nAmAvaliH.itx

Category : aShTottarashatanAmAvalI

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ वकारादि श्रीवामनाष्टोत्तरशतनामावलिः ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

ॐ वामनाय नमः ।
ॐ वारिजाताक्षाय नमः ।
ॐ वर्णिने नमः ।
ॐ वासवसोदराय नमः ।
ॐ वासुदेवाय नमः ।
ॐ वावदूकाय नमः ।
ॐ वालखिल्यसमाय नमः ।
ॐ वराय नमः ।
ॐ वेदवादिने नमः ।
ॐ विद्युदाभाय नमः । १०
ॐ वृतदण्डाय नमः ।
ॐ वृषाकपये नमः ।
ॐ वारिवाहसितच्छत्राय नमः ।
ॐ वारिपूर्णकमण्डलवे नमः ।
ॐ वलक्षयज्ञोपवीताय नमः ।
ॐ वरकौपीनधारकाय नमः ।
ॐ विशुद्धमौञ्जीरशनाय नमः ।
ॐ विधृतस्फाटिकस्रजाय नमः ।
ॐ वृतकृष्णाजिनकुशाय नमः ।
ॐ विभूतिच्छन्नविग्रहाय नमः । २०
ॐ वरभिक्षापात्रकक्षाय नमः ।
ॐ वारिजारिमुखाय नमः ।
ॐ वशिने नमः ।
ॐ वारिजाङ्घ्रये नमः ।
ॐ वृद्धसेविने नमः ।
ॐ वदनस्मितचन्द्रिकाय नमः ।
ॐ वल्गुभाषिणे नमः ।
ॐ विश्वचित्तधनस्तेयिने नमः ।
ॐ विशिष्टधिये नमः ।
ॐ वसन्तसदृशाय नमः । ३०
ॐ वह्निशुद्धाङ्गाय नमः ।

ॐ विपुलप्रभाय नमः ।
ॐ विशारदाय नमः ।
ॐ वेदमयाय नमः ।
ॐ विद्वदर्धिजनावृताय नमः ।
ॐ वितानपावनाय नमः ।
ॐ विश्वविस्मयाय नमः ।
ॐ विनयान्विताय नमः ।
ॐ वन्दारुजनमन्दाराय नमः ।
ॐ वैष्णवर्क्षविभूषणाय नमः । ४०
ॐ वामाक्षिमदनाय नमः ।
ॐ विद्वन्नयनाम्बुज भास्कराय नमः ।
ॐ वारिजासनगौरीशवयस्याय नमः ।
ॐ वासवप्रियाय नमः ।
ॐ वैरोचनिमखालङ्कृते नमः ।
ॐ वैरोचनिवनीपकाय नमः ।
ॐ वैरोचनियशस्सिन्धुचन्द्रमसे नमः ।
ॐ वैरिबाडबाय नमः ।
ॐ वासवार्थस्वीकृतार्थिभावाय नमः ।
ॐ वासितकैतवाय नमः । ५०
ॐ वैरोचनिकराम्भोजरससिक्तपदाम्बुजाय नमः ।
ॐ वैरोचनिकराब्धारापूरिताञ्जलिपङ्कजाय नमः ।
ॐ वियत्पतितमन्दाराय नमः ।
ॐ विन्ध्यावलिकृतोत्सवाय नमः ।
ॐ वैषम्यनैर्घृण्यहीनाय नमः ।
ॐ वैरोचनिकृतप्रियाय नमः ।
ॐ विदारितैककाव्याक्षाय नमः ।
ॐ वांछिताङ्घ्रित्रयक्षितये नमः ।
ॐ वैरोचनिमहाभाग्य परिणामाय नमः ।
ॐ विषादहृते नमः । ६०
ॐ वियद्दुन्दुभिनिर्घुष्टबलिवाक्यप्रहर्षिताय नमः ।
ॐ वैरोचनिमहापुण्याहार्यतुल्यविवर्धनाय नमः ।
ॐ विबुधद्वेषिसन्त्रासतुल्यवृद्धवपुषे नमः ।
ॐ विभवे नमः ।
ॐ विश्वात्मने नमः ।
ॐ विक्रमक्रान्तलोकाय नमः ।
ॐ विबुधरञ्जनाय नमः ।

ॐ वसुधामण्डलव्यापि दिव्यैकचरणाम्बुजाय नमः ।
ॐ विधात्रण्डविनिर्भेदिद्वितीयचरणाम्बुजाय नमः ।
ॐ विग्रहस्थितलोकौघाय नमः । ७०
ॐ वियद्गङ्गोदयाङ्घ्रिकाय नमः ।
ॐ वरायुधधराय नमः ।
ॐ वन्द्याय नमः ।
ॐ विलसद्भूरिभूषणाय नमः ।
ॐ विष्वक्सेनाद्युपवृताय नमः ।
ॐ विश्वमोहाब्जनिस्स्वनाय नमः ।
ॐ वास्तोष्पत्यादिदिक्पालबाहवे नमः ।
ॐ विधुमयाशयाय नमः ।
ॐ विरोचनाक्षाय नमः ।
ॐ वह्न्यास्याय नमः । ८०
ॐ विश्वहेत्वर्षिगुह्यकाय नमः ।
ॐ वार्धिकुक्षये नमः ।
ॐ वरिवाहकेशाय नमः ।
ॐ वक्षस्थ्सलेन्दिराय नमः ।
ॐ वायुनासाय नमः ।
ॐ वेदकण्ठाय नमः ।
ॐ वाक्छन्दसे नमः ।
ॐ विधिचेतनाय नमः ।
ॐ वरुणस्थानरसनाय नमः ।
ॐ विग्रहस्थचराचराय नमः । ९०
ॐ विबुधर्षिगणप्राणाय नमः ।
ॐ विबुधारिकटिस्थलाय नमः ।
ॐ विधिरुद्रादिविनुताय नमः ।
ॐ विरोचनसुतानन्दाय नमः ।
ॐ वारितासुरसन्दोहाय नमः ।
ॐ वार्धिगम्भीरमानसाय नमः ।
ॐ विरोचनपितृस्तोत्र कृतशान्तये नमः ।
ॐ वृषप्रियाय नमः ।
ॐ विन्ध्यावलिप्राणनाध भिक्षादायने नमः ।
ॐ वरप्रदाय नमः । १००
ॐ वासवत्राकृतस्वर्गाय नमः ।
ॐ वैरोचनिकृतातलाय नमः ।
ॐ वासवश्रीलतोपघ्नाय नमः ।

ॐ वैरोचनिकृतादराय नमः ।
ॐ विबुधद्रुसुमापाङ्गवारिताश्रितकश्मलाय नमः ।
ॐ वारिवाहोपमाय नमः ।
ॐ वाणीभूषणाय नमः ।
ॐ वाक्पतयेनमः । १०८

॥ इति वकारादि श्री वामनाष्टोत्तरशतनामावलि रियं पराभव
श्रावण बहुल प्रतिपदि लिखिता रामेण दत्ता च
श्री हयग्रीवार्पणमस्तु ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

.. vakArAdi shrI vAmanAShTottarashatanAmAvaliH ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*